CAREERINDIA

96. शुद्धपर्यावरणम् अस्मभ्यं किं न प्रददाति ?
(1) जीवनसुखम् (2) सद्विचारम् (3) प्राकृतिक विपत्तिम् (4) सत्यसङ्कल्पम्

97. 'धर्मस्यैव' इत्यस्मिन् पदे सन्धिनिर्देशं कुरुत–
(1) गुणसन्धिः (2) वृद्धिसन्धिः (3) हल्सन्धिः (4) दीर्घसन्धिः

98. मत्स्यादीनां नाशो केन भवति ?
(1) अम्लेन (2) दुग्धेन (3) विषाक्तजलेन (4) वर्षाजलेन

99. 'विकृतिः' इत्यस्मिन् पदे कः प्रत्ययः प्रयुक्तः ?
(1) क्त (2) शतृ (3) क्तिन् (4) क्तवतु

**अधोलिखितान् पद्यान् पठित्वा प्रश्नानां (100-105) विकल्पात्मकोत्तरेभ्यः उचिततमं उत्तरं चिनुत ।**

गृहीत्वा दक्षिणां विप्रास्त्यजन्ति यजमानकम् ।
प्राप्तविद्या गुरुं शिष्या दग्धाऽरण्यं मृगास्तथा ।।1।।
आचारः कुलमाख्याति देशम् आख्याति भाषणम् ।
सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम् ।।2।।
रूपयौवनसम्पन्नाः विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।।3।।
उद्योगे नास्ति दारिद्र्यम् जपतो नास्ति पातकम् ।
मौने च कलहो नास्ति नास्ति जागरिते भयम् ।।4।।
एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना ।
आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी ।।5।।

100. अधोलिखितेषु क्रियापदं चिनुत ।
(1) दारिद्र्यम् (2) साधुना (3) शोभन्ते (4) शर्वरी

101. दक्षिणां गृहीत्वा यजमानकं के त्यजन्ति ?
(1) मित्राणि (2) विप्राः (3) छात्राः (4) सम्बन्धिनः

102. सुपुत्रस्य तुलना केन सह कृता ?
(1) वृक्षेण (2) चन्द्रेण (3) गजेन (4) पुष्पेण

103. आह्लादितं– इत्यस्मिन् पदे कः प्रत्ययः अस्ति ?
(1) क्त (2) शतृ (3) शाणच् (4) मतुप्

104. 'विद्याहीनाः' इत्यस्मिन् पदे कः समासः वर्तते ?
(1) द्वन्द्वसमासः (2) तत्पुरुषसमासः (3) अव्ययीभावसमासः (4) कर्मधारयसमासः

105. भोजनं किं आख्याति ?
(1) देशः (2) आचारः (3) सम्भ्रमः (4) वपुः

www.careerindia.com

CAREERINDIA

**106.** अध्यापकेषु, छात्रेषु सामग्रीषु च परीक्षाणां आकलनानां च प्रभाव: कथ्यते–

(1) सामूहिकप्रभाव: (Corpus effect)
(2) प्रतिवाहीप्रभाव: (Washback effect)
(3) कक्षाप्रभाव: (Classroom effect)
(4) पुनर्बलनम् (Reinforcement)

**107.** विद्यालयै: समायोगात्मकद्विभाषावादस्य अनुकरणं कर्तव्यम्, यतो हि अयं–

(1) छात्रस्य भाषाया: संस्कृते: च सम्मानं करोति
(2) द्वितीयभाषारूपेण आङ्गलभाषाया: अध्यापनं महत्त्वं ददाति
(3) छात्रस्य भाषाया: संवर्धनं करोति, न तु तस्य संस्कृते:
(4) प्रथमभाषाया: विकासं बाधते

**108.** भाषिकक्रिया यथा शैली, स्वर: (Tone), बलाघात: (Stress), ताल: (Rhythm) कथ्यते–

(1) काव्यरचना (Poetry)
(2) छन्दोज्ञानम् (Prosody)
(3) स्वनिक: (Phonetic)
(4) तथ्यात्मक: (Pragmatic)

**109.** भारतदेशे भाषाणां विषये अधोलिखितेषु किं कथनं सत्यं न अस्ति ?

(1) भारतीयसंविधानानुसारं आङ्गलभाषा एका संयुक्तराजकीय भाषा अस्ति
(2) भारतीयसंविधानस्य अष्टमानुच्छेदसूच्यनुसारं द्वाविंशति: भाषा: सन्ति
(3) संस्कृतं एका आधुनिकभारतीयभाषा अस्ति (MIL)
(4) हिन्दीभाषा भारतीयप्रायद्वीपस्य व्यवहारभाषा अस्ति (Lingua Franca)

**110.** एकस्यां भाषाकक्षायां छात्रा: अध्यापकस्य निर्देशने वर्गाणां (Groups) निर्माणं कुर्वन्ति । ते एकस्मिन् दत्तविषये एकं विज्ञापनं प्रस्तुवन्ति । अनेन विधिना भाषाधिगम: कथ्यते–

(1) संयुक्ताधिगम:
(2) स्पर्धा प्रतिद्वंद्विता च
(3) भाषाक्रीडा:
(4) निर्देशनं परामर्श: च (Counselling)

**111.** एका अध्यापिका एकं कार्यं ददाति, यस्मिन् छात्रा: भोजनालयेषु (Restaurants) प्रयुक्तया शब्दावल्या सुपरिचिता: भवेयु: । अस्य पाठस्य अधोलिखितेषु क: उद्देश्य: भवितव्य: ?

(1) छात्रं शाब्दिकविषयाणां परिचयदानम्
(2) व्याकरणात्मकविषयै: सुपरिचय:
(3) अवकाशगन्तव्यस्थानविषयकस्य पाठस्य भूमिकाया: प्रस्तुति: (To introduce)
(4) समालोचनात्मकविचारशीलताया: विकास:

**112.** कस्या: अधिगमशाखाया: (School of Learning) मतं आसीत् यत् भाषा–मौखिकं अमौखिकं वा, अभ्यासनिर्माणप्रक्रियया सम्भवति ?

(1) क्रियावादी (Functionalist)
(2) व्यवहारवादी (Behaviourist)
(3) प्रज्ञानवादी (Cognitivist)
(4) विनिमयवादी (Interactionalist)

**113.** कथाया: समय: स्थानं च कथ्येते–

(1) विषय: (Theme)
(2) स्थापनम् (Setting)
(3) कथावस्तु (Plot)
(4) ऊर्द्ध्वगमनम् (Climax)

www.careerindia.com

CAREERINDIA

**114.** एकस्यां भाषाकक्षायां, एका अध्यापिका छात्राणां एकं समूहं क्रेतारूपेण, भूसम्पत्तिविक्रेतारूपेण, गृहस्वामीरूपेण,अधिवासीरूपेण च अभिनेतुं निर्दिशति । तावत् अन्यान् छात्रान् तान् द्रष्टुं, तेषां वार्तालापात् आनन्दग्रहणाय च कथयति । अयं गतिविधि: कथ्यते–

(1) भूमिकानिर्वहणम् (Role play) (2) नाटकम् (Drama)
(3) अभिनयकक्षा (Acting class) (4) निर्देशनम् (Guidance)

**115.** एका भाषाध्यापिका पञ्चमकक्षाया: छात्राणां शिक्षणार्थं प्रतिदिनं वस्तूनि यथा समाचारपत्रं, व्यञ्जनसूचीपत्राणि (Menu-cards), रेलपत्रकाणि (Rail-tickets) च आनयति । सा अध्ययनं केन रूपेण कर्तुं प्रयतते ।

(1) सा स्वशिक्षणं अधिकतरं यथार्थं लाभकारि च कर्तुं प्रामाणिकसामग्रीनां प्रयोग: करोति
(2) सा बहुभाषानां शिक्षितुं स्वछात्राणां सहायतां करोति
(3) सा इच्छति यत् तस्या: छात्रा: वास्तविक जीवनसदृशस्थित्या: माध्यमेन आङ्ग्लभाषां शिक्षेयु:
(4) सा छात्राणां मध्ये जागरूकतां उत्पादयति

**116.** श्रवणपाठस्य योजनायां अधोलिखितेषु किं एकं महत्त्वपूर्णं तत्त्वं न अस्ति ?

(1) ध्वन्यङ्कनविरति: (Pausing the recording)
(2) वाचनगति: (Speed of delivery)
(3) वक्तॄणां लिङ्ग: (Gender of speakers)
(4) वक्तॄणां संख्या (Number of speakers)

**117.** भारतदेशे बहुभाषिकतावाद: अध्यापकान् किं अवबोद्धुं इच्छति ?

(1) सम्प्रेषणं भवति सामाजिकसंसक्ति:(Social Cohesion) च संवर्धते
(2) अप्रधानभाषा: प्रमुखभाषाभि: सह संयोज्या:
(3) एकस्या: भाषानीते: निर्माणं विविधतापूर्णसमाजे कर्तव्यम्
(4) भाषा, समरूपता (Identity) संस्कृति: च पृथक् वर्तते

**118.** भाषाया: किं कौशलं ग्राह्यताकौशलरूपेण (Receptive skill) ज्ञायते ?

(1) श्रवणं कथनं च (2) कथनं लेखनं च (3) पठनं लेखनं च (4) श्रवणं पठनं च

**119.** श्रवणे समाविष्ट: भवति–

(1) ध्वनिश्रवणं ध्वनीनां यथावत् निष्कूटनम् (Decoding)
(2) प्रतिपाद्यस्य अनुमानम्
(3) विषयस्य पूर्वज्ञानस्य प्रयोग:
(4) ध्वनीनाम् अभिज्ञानं तस्मात् च अर्थनिमगनम्

**120.** **A** तालिकायां भाषाध्यापनविधीनां सम्मेलनं **B** तालिकायां तेषां अवबोधनेन सम्बद्धगतिविधिभि: सह कुरुत –

| | **A** | | **B** |
|---|---|---|---|
| (a) | सम्प्रेषणात्मभाषा अध्यापनम् | (i) | सामाजिकरूपेण स्वीकार्या प्रसङ्गानुसारं उपयुक्तभाषा |
| (b) | प्रत्यक्षविधि: | (ii) | मूकपठनम् |
| (c) | व्याकरणानुवाद: | (iii) | लिखित साहित्यिकपाठा: |
| (d) | वैस्ट इत्यस्य नवीनविधि: | (iv) | व्याकरणस्य अध्यापनं नियमानुसारं क्रियते |

(1) (a)-(i), (b)-(iv), (c)-(iii), (d)-(ii)
(2) (a)-(iv), (b)-(ii), (c)-(iii), (d)-(i)
(3) (a)-(iii), (b)-(i), (c)-(ii), (d)-(iv)
(4) (a)-(ii), (b)-(i), (c)-(iv), (d)-(iii)

www.careerindia.com

CAREERINDIA

## PART–V

## LANGUAGE–II

## SANSKRIT

| |
|---|
| अभ्यर्थिन: **पञ्चमभागस्य (Part-V)** प्रश्नानाम् **( प्र.सं. 121-150 )** उत्तरं दद्यु:, यदि तै: **संस्कृतं द्वितीयभाषा (Language-II)** रूपेण चितम्। |

**अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (121-128) विकल्पात्मकोत्तरेभ्य: उचिततमं उत्तरं चिनुत ।**

प्राचीनकाले वाल्मीकि: नाम एक: ऋषि: आसीत् । एकदा स्वशिष्यै: सह स: तमसानद्या: तटे विहरति स्म । तदैव स: व्याधेन विद्धम् एकं क्रौञ्चमपश्यत् । तस्य वियोगेन क्रौञ्ची उच्चै: अरुदत् । तस्या: रोदनं श्रुत्वा ऋषि: द्रवीभूत: अभवत् । तस्य मुखात् अयं श्लोक: सहसा एव निर्गत: –

''मा निषाद! प्रतिष्ठां त्वमगम: शाश्वती: समा: ।

यत्क्रौञ्चमिथुनादेकमवधी: काममोहितम् ।।''

अयं श्लोक: लौकिकसंस्कृतसाहित्यस्य प्रथमा रचना अस्ति । ऋषे: वाणीं श्रुत्वा ब्रह्मा स्वयमेव तत्र उपस्थित: अभवत् ऋषिं च रामचरितं लेखितुं प्रेरितवान् । ब्रह्मण: आदेशानुसारं महर्षिणा वाल्मीकिना श्लोकबद्धा रामायणी कथा लिखिता । संस्कृतसाहित्ये रामायणं नाम महाकाव्यम् आदिकाव्यं मन्यते ऋषिश्च आदिकवि: । रामायणम् एकमुपजीव्यं काव्यमस्ति । अस्य कथा: गृहीत्वा अनेकानि काव्यानि महाकाव्यानि नाटकानि च रचितानि ।

अस्मिन् काव्ये सर्वत्र स्वाभाविकता वर्तते । प्रकृतिवर्णने तु महर्षि: वाल्मीकि: अप्रतिम एव । अस्य पात्रसृष्टि: सजीवा व्यक्तित्वयुक्ता च विद्यते । सीताया: चरितं भारतीयनारीचरितादर्शस्य प्रतीकमस्ति । मातृप्रेम्ण: यादृशी भावना अत्र दरीदृश्यते न सा प्राप्यते अन्यत्र कुत्रापि । आदर्श: आज्ञापालक: धर्मरक्षक: रामसदृश: सुत:, भरतलक्ष्मणशत्रुघ्नसदृशा: भ्रातर:, दशरथतुल्य: पिता, कौशल्यासुमित्रातुल्ये जनन्यौ, सीतासदृशीसाध्वी पत्नी, हनुमत्सदृश: सेवक:, सुग्रीवतुल्य: सुहृत्, विभीषणसदृश: भक्त: च अन्यत्र कुत्रापि विश्वसाहित्ये नैव दृश्यन्ते । सीता मातृरूपेण सम्मान्यते श्रीरामश्च भगवद्रूपेण । मानवजीवनस्य अमूल्यानि तत्त्वानि अत्र वर्णितानि सन्ति ।

**121.** रामायणस्य कथा: गृहीत्वा कानि न लिखितानि ?

(1) गणितस्य सूत्राणि (2) महाकाव्यानि (3) नाटकानि (4) काव्यानि

**122.** सर्वेभ्य:– इत्यस्मिन् पदे का विभक्ति: किं च वचनम् अस्ति ?

(1) तृतीया विभक्ति:, बहुवचनम् (2) चतुर्थी विभक्ति:, बहुवचनम्

(3) षष्ठी विभक्ति:, एकवचनम् (4) सप्तमी विभक्ति:, द्विवचनम्

**123.** रामायणस्य पात्रसृष्टि: कीदृशी वर्तते ?

(1) प्रथमा (2) अतुल्या (3) कृत्रिमतायुक्ता (4) सजीवा

**124.** क्रौञ्ची कस्य वियोगेन उच्चै: अरुदत् ?

(1) गृहस्य (2) क्रौञ्चस्य (3) शुकस्य (4) मातु:

www.careerindia.com

**125.** रामायणं एकं __________ काव्यम् अस्ति । अत्र रिक्तस्थानं पूरयत ।

(1) सरसम् (2) प्रसिद्धम् (3) उपजीव्यम् (4) अपठितम्

**126.** अधोलिखितेषु किं क्त्वाप्रत्ययान्तं पदं न वर्तते ?

(1) युक्ता (2) श्रुत्वा (3) गृहीत्वा (4) लिखित्वा

**127.** संस्कृतसाहित्ये आदिकविः कः मन्यते ?

(1) भवभूतिः (2) भासः (3) व्यासः (4) वाल्मीकिः

**128.** कस्मिन् ग्रन्थे जीवनमूल्यानि वर्णितानि सन्ति ?

(1) महाभारते (2) रघुवंशे (3) रामायणे (4) गीतायाम्

**अधोलिखितं गद्यांशं पठित्वा प्रश्नानां (129-135) विकल्पात्मकोत्तरेभ्यः उचिततमं उत्तरं चिनुत ।**

संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा अस्ति । विश्वस्य प्राचीनतमः ग्रन्थः 'ऋग्वेदः' अस्यामेव भाषायाम् लिखितः अस्ति । इयम् भाषा सुरवाणी, देववाणी, गीर्वाणवाणी, सुरभारती, देवभाषा प्रभृतिभिः नामभिः लोके विख्याता अस्ति । इयम् रम्या, मधुरा, दिव्या, सरला, सरसा च भाषा अस्ति । इयम् भाषा अलौकिकैः गुणैः समृद्धा वर्तते । इयमेव भाषा सर्वासाम् भारतीयभाषाणाम् जननी । सर्वासु एव भाषासु संस्कृतशब्दाः प्राचुर्येण उपलभ्यन्ते ।

वेदाः, उपनिषदः, पुराणानि, रामायणम्,महाभारतम्–इत्यादयः हिन्दूनाम् अनेके धार्मिकाः ग्रन्थाः संस्कृते एव लिखिताः सन्ति । विश्वविख्याता गीता महाभारतस्यैव अंशः अस्ति । महाकवेः कालिदासस्य रघुवंशम् अभिज्ञानशाकुन्तलम् च, भवभूतेः उत्तररामचरितादयः ग्रन्थाः संस्कृतसाहित्ये विशेषरूपेण प्रसिद्धाः सन्ति । एतान् पठित्वा न केवलं भारतीयाः अपितु वैदेशिकाः अपि चकितचकिताः भवन्ति।

अस्याः अध्ययनेनैव अस्माकम् सर्वेषाम् नैतिकम्, आध्यात्मिकम्, सामाजिकम् च कल्याणम् संभवम् किन्तु दुःखस्य विषयोऽयं यत् अधुना जनाः संस्कृतभाषाम् संस्कृतसाहित्यम् च पठितुम् नैव इच्छन्ति । आधुनिके कलियुगे आंग्लभाषायाः एव महत्वम् वर्तते ।

स्वसंस्कृतिम् ज्ञातुमपि संस्कृतस्य अध्ययनम् अनिवार्यं वर्तते । अतः संस्कृतभाषायाः माहात्म्यं गौरवं च विज्ञाय अस्माभिः सर्वैः अस्याः प्रचारे प्रसारे च प्रयत्नः करणीयः ।

**129.** भवभूतेः कः ग्रन्थः प्रसिद्धः अस्ति ?

(1) ऋग्वेदः (2) उत्तररामचरितम् (3) जानकीहरणम् (4) स्वप्नवासवदत्तम्

**130.** आधुनिके कलियुगे कस्याः भाषायाः महत्वं वर्तते ?

(1) पञ्जाबीभाषा (2) फ्रैन्चभाषा (3) आङ्ग्लभाषा (4) फारसीभाषा

**131.** अधोलिखितेषु किं तृतीया विभक्तेः पदं न अस्ति ?

(1) नामभिः (2) गौरवम् (3) प्राचुर्येण (4) अस्माभिः

**132.** संस्कृतभाषा कीदृशी न वर्तते ?

(1) परुषा (2) सरला (3) दिव्या (4) रम्या

133. कान् पठित्वा भारतीयाः वैदेशिकाः च चकिताः भवन्ति ?

(1) गणितविषयस्य पुस्तकानि (2) संस्कृतसाहित्यस्य ग्रन्थान्

(3) तमिलभाषायां लिखितान् ग्रन्थान् (4) संगीतग्रन्थान्

134. अध्ययनेनैव- इत्यस्य पदस्य सम्यक् सन्धिविच्छेदं कुरुत ।

(1) अध्ययने + नैव (2) अध्यय + नेनैव (3) अधि + अध्ययनेनैव (4) अध्ययनेन + एव

135. संस्कृतभाषा कैः समृद्धा वर्तते ?

(1) सुन्दरतया (2) अलौकिकैः गुणैः (3) नैतिकतया (4) चमत्कारेण

136. अधोलिखितेषु किं साधनं वर्तते यत् अनेकान् ऑनलाइन (Online) समकालिकान् असमकालिकान् च अध्यापन-अवसरान् उपस्थापयति ?

(1) पाठ्यपुस्तकम् (2) रेलपत्रकम् (Railway ticket)

(3) दूरदर्शनम् (4) पैडलेट (Padlet)

137. रचनात्मक-आकलनाय किं साधनं आदर्शं न अस्ति ?

(1) निबन्धनम् (Assignment) (2) पत्र-लेखनी परीक्षा (Pen-pencil Test)

(3) परियोजना (Project) (4) कक्षाप्रस्तुतिः (Class Presentation)

138. भाषाध्यापनाय दैनंदिनवस्तूनां प्रयोगः कथ्यते-

(1) यथार्थता (Realia) (2) भाषाक्रीडाः (Language games)

(3) अध्यापनसाधनम् (Teaching aid) (4) पाठः (Text)

139. शिक्षानीत्यां (त्रिभाषासूत्रम्) भारतस्य भाषा किं संवर्धयितुं प्रयतते-

(1) बहुभाषाशिक्षा (Multilanguage education)

(2) एकभाषिकशिक्षा (Monolingual education)

(3) हिन्दीभाषां केन्द्रीकृत्वा द्विभाषिकशिक्षा

(4) मातृभाषाधारितः बहुभाषिकतावादः

140. ऊर्ध्व-अधोगामीप्रक्रियाविषये किं सत्यं न अस्ति ?

(1) श्रोतारः तेषां पूर्वज्ञाने आश्रिताः भवन्ति (2) श्रोतारः अभिप्रेतार्थस्य विषये अनुमानानि कुर्वन्ति

(3) श्रोतारः विश्वस्य ज्ञानस्य प्रयोगं कुर्वन्ति (4) श्रोतारः प्रत्येकशब्दं अवगन्तुं समर्थाः भवेयुः

141. अन्तर्राष्ट्रीयमातृभाषादिवसः कदा आयोज्यते ?

(1) 1 जनवरी (2) 14 फरवरी (3) 21 फरवरी (4) 13 अप्रैल

**142.** यदि भवान् एकं सहकर्मिनं, यः भवतः मित्रम् अस्ति, ईमेल (Email) लिखितुम् इच्छति, अधोलिखितेषु ईमेलप्रकार कः भवेत् ?

(1) अनौपचारिकः (Informal) (2) औपचारिकः (Formal)

(3) व्यवासायिकः (Business) (4) पत्राचारः (Correspondence)

**143.** छात्रस्य अधिगमं अवबोधं च स्पष्टीकरणाय अध्ययनाध्यापनान्तरं यत् आकलनं क्रियते तत् कथ्यते–

(1) अधिगमाय आकलनम् (2) अधिगमस्य आकलनम्

(3) अधिगमे आकलनम् (4) अधिगमरूपेण आकलनम्

**144.** एकस्यां द्वितीयभाषाकक्षायां एकः अध्यापकः 'स्वास्थ्यं धनम् अस्ति' इति विषये श्रव्यस्य प्रयोगः करोति । तदा सः पत्राणां वितरणं करोति एवं छात्रान् दत्तेभ्यः विकल्पेभ्यः शुद्धं उत्तरं चेतुं कथयति । पाठस्य उद्देश्यः छात्रान् कस्मिन् समर्थीकर्तुं आसीत्

(1) स्वास्थ्यविषयकं पाठं श्रुणोतुम् (2) एकस्मिन् कार्ये छात्रान् संलग्नीकर्तुम्

(3) विचाराणां विश्लेषणार्थं श्रवणम् (4) स्वास्थ्य एवं धनविषयकं पाठं कण्ठस्थीकर्तुम्

**145.** भाषाधिगमे त्रुटिविषये किं सत्यं न अस्ति ?

(1) त्रुटयः भाषाधिगमप्रक्रियायां बाधिकाः भवन्ति

(2) त्रुटयः सर्वदा न दोषावहाः अधिगमे च सहायिकाः भवन्ति

(3) त्रुटयः भाषाधिगमप्रक्रियायाः निर्णायकपक्षाः भवन्ति

(4) त्रुटयः द्वितीयभाषाधिगृहणस्य प्रक्रियां अधिगन्तुं सहायिकाः भवन्ति

**146.** भाषाशिक्षायां क्रियात्मकता अस्ति–

(1) मुक्तकक्षाकार्याणि येषु व्याख्यावैभिन्याय उत्तराय च अवसराः भवेयुः

(2) किञ्चित् विषयं अवगन्तुं भिन्नेभ्यः विषयेभ्यः तत्त्वानां समावेशनम्

(3) कक्षागतिविधिः यस्मिन् अध्यापनस्य नवीनविधीनां प्रयोगः क्रियते

(4) कक्षासामग्री यस्यां सम्प्रेषणात्मकभाषा अध्यापनस्य प्रयोगः क्रियते

**147.** 'छात्रेभ्यः भाषायाः परिचयः दातव्यः, एवं त्रुटयः अस्य प्रमाणाः भवन्ति यत् अधिगमः प्रवर्तते'– अस्य समर्थनं केन कृतम् ?

(1) व्यवहारवादिनः (Behaviourists) (2) संज्ञानवादी (Cognitivist)

(3) मानवतावादी (Humanist) (4) मनोविश्लेषकः (Psychoanalyst)

www.careerindia.com

